हरिद्रा
(सांस्कृतिक शोध का अन्तरराष्ट्रीय उपक्रम)
ISSN : 2582-9092

# पाणिनीयसूत्रव्याख्याने ऐतिहासिकतथ्यानि : एकमनुशीलनम्

## डॉ. धर्मेन्द्र दास

**शोधसारांशः**
ऐतिहासिकम् अध्ययनं प्रति संस्कृतसाहित्यस्य महत्त्वपूर्णं योगदानं वर्तते । अस्यामेव धारायां भगवतः पाणिनेः सर्वोत्कृष्टा कृतिः अष्टाध्यायी । सूत्रात्मकस्यास्य भुवनविदितस्य ग्रन्थस्य व्याख्यानं गवेषणाक्षेत्रे महोपकारकमस्ति । पणिनीयसूत्राणां व्यख्यानावसरे संगृहीताः उदाहरणशब्दाः विविधवैशिष्ट्यपरकाः। वामनजयादित्याभ्यां विरचिता प्रसिद्धा वृत्तिः काशिका उदाहरणमण्डिता । काशिकायां संगृहीतानि उदाहरणानि प्रत्युदाहरणनि ऐतिहासिकतथ्यप्रदानि । काशिकाध्ययनं पाणिनीयसूत्रार्थज्ञाने महत् सहायकं भवति । प्रस्तुतं शोधपत्रं पाणिनीयसूत्राणां व्याख्यानावसरे प्रदत्तानाम् ऐतिहसिकतथ्यानाम् एकमनुशीलनं करोति । प्राचीनभारतस्य महनीयानां तत्त्वानां परिचयप्रदाने शोधवाङ्मये शोधपत्रमिदं यत्नमात्रम् ।

**कूटशब्दाः** : काशिका, उदाहरणम्, पाणिनिः, सूत्रम्, संस्कृतम्, व्याकरणम्

1. उपक्रमः

काशयति प्रकाशयति सूत्रार्थमिति काशिका । सूत्रार्थप्रधानो ग्रन्थो वृत्तिः । पाणिनीयसूत्राणां व्याख्यानग्रन्थत्वेन काशिकावृत्तिः प्रसिद्धा । काशिकावृत्तेः नामकरणं देशमूलकमिति विद्वद्भिः स्वीक्रियते । अस्याः रचना काशीनामके देशे अभूत् इति हरदत्तेन स्पष्टीकृतम् । काशिकेति देशतोऽभिधानम् । काशिषु भवा । यद्यपि काशिकानामकरणं सूत्रार्थप्रकाशनपरकमस्ति, तथापि काशिकानिष्ठानां भौगोलिकतत्त्वानाम् आलोचनाप्रसङ्गे देशभित्तिकं नामकरणमत्र याथार्थ्येन गृह्यते ।

2. प्रस्तुताध्ययनस्य प्रासङ्गिकता

उदाहरणमण्डिता काशिकावृत्तिः । काशिकापठितमुदाहरणनिष्ठं भौगोलिकतत्त्वं प्राचीनस्य भारतीयेतिहासस्य कृते वैशिष्ट्यपूर्णमस्ति। देश–पर्वत–समुद्र–वन–नदी–प्रदेश–जनपद–नगर–ग्रामादिभौगोलिकतत्त्वानां संग्रहः सूत्रोदाहरणमाध्यमेन काशिकायां सुविहितः । पाणिनीयव्याकरणस्य अध्ययनं समग्रे देशे प्रवर्तिततमासीदिति काशिकातः ज्ञायते । यतः व्याकरणस्य सम्बन्धः भाषया सह, भाषायाः सम्बन्धश्च देशविशेषैः सह तिष्ठति, अतः काशिकावृत्तिसहितं पाणिनीयशास्त्रस्य अध्ययनं न केवलम् संस्कृतव्याकरणे प्रवेशः सुलभः स्यात् अपि तु भारतीयभौगोलिकतत्त्वानां परिचयज्ञाने महत् सहायकं भवेत् । कष्टं व्याकरणमिति मन्यमानानां नव्यानां शोधार्थिनां च कृते प्रस्तुताध्ययनं मार्गदर्शकानुरूपं स्यात् ।

3. ऐतिहासिकतत्वानाम् आधारभूता काशिकावृत्तिः

हृदयस्य प्रियो हृद्यो देशः । पाणिनीयसूत्राणां व्याख्यानावसरे काशिकावृत्तौ प्राचीनदेशानां जनपदानां वा नामानि उदाहरणरूपेण संगृहीतानि वर्तन्ते। ग्रामसमुदायो जनपदः उच्यते । पञ्चालानां निवासो जनपदः पाञ्चालाः । कुरवः, मत्स्याः, अङ्गाः, वङ्गाः, मगधाः, सुह्याः, पुण्ड्राः इत्येवं बहुवचनेन देशनामानि काशिकायां निर्दिष्टानि । उदाहृतदेशानां वैशिष्ट्यप्रतिपादकत्वात् काशिकावृत्तिः ऐतिहासिकतत्त्वानामपि आधारः भवितुमर्हति। ऐतिहासिकतत्त्वानामाधारभूतां काशिकावृत्तिमुररीकृत्य तत्र पठितानां देशवाचकानाम् उदाहरणशब्दानां पर्यालोचनं क्रियते ।

4. कम्बोजाल्लुक्

'कम्बोजाल्लुक्'इति पाणिनीयसूत्रस्य व्याख्यानावसरे पञ्चानां देशानां नामानि प्राप्यन्ते । यथा–कम्बोजः, चोलः, केरलः, शकः, यवनः चेति । अत्र कम्बोजशब्दः जनपदरूपेण परिचीयते। कम्बोजाख्यः प्राचीनदेशस्य राजधानी राजपुरः असीदिति ज्ञायते । देशोऽयं सम्प्रति 'कम्बोडिया' इति नाम्ना ऐतिहासिकैः स्वीक्रियते । तत्रस्थः राजा 'कम्बोजः' इत्यपि ज्ञायते। 'कम्बोजाल्लुक्'इति सूत्रव्याख्याने ये पञ्च देशाः उदाहृताः, तेषु यवनदेशः अन्यतमः । पाणिनिकालिकभारतेन सह यवनदेशस्य सम्बन्धः सुदृढः आसीत् । कात्यायनकालिके भारतवर्षे यवनदेशीयाः सुसमृद्धाः आसन् । तेषां लिपिः 'यवानानी' इति सुप्रचलिता आसीत् । काशिकायां 'यवनमुण्डः' इत्यपरमुदाहरणं प्राप्यते । यवन इव मुण्डः यवनमुण्डः । यवनदेशीयाः मुण्डितशिरस्काः आसन् इत्यस्मादुदाहरणात् ज्ञायते। यवनदेशेन सह शकदेशस्य नाम उदाहृतम्। 'एङि पररूपम्' इति सूत्रप्रसङ्गे काशिकायां महाभाष्यगतं वार्तिकमेकमधिगम्यते । तत्र 'शकन्धुः' इति शब्दः उदाहृतः दृश्यते । अन्धुशब्दः कूपार्थे प्रयुज्यते । शकदेशस्य अन्धुशब्देन सम्बन्धः प्राचीनः इति ज्ञायते । नूनमेव शकदेशस्य समृद्धित्वमस्मात् अनुमीयते ।

कम्बोजाल्लुक्' इति सूत्रस्य व्याख्यानावसरे चोलकेरलदेशयोश्च परिचयः लभ्यते । अत्र सूत्रे पञ्चदेशानां नामानि उदाहृतानि वर्तन्ते । कम्बोजः, शकः, यवनश्चेति अपरे त्रयः देशाः पूर्वमेवालोचिताः। एतेषां पञ्चानां देशानां मिथः सम्बन्धः आसीदिति ज्ञायते । अत्रस्थाः राजानः अपि देशनाम्ना एव अभिज्ञायन्ते ।

5. विषयो देशे

'विषयो देशे' इति पाणिनीयसूत्रे ग्रामसमुदायार्थे देशशब्दः व्याख्यातः काशिकायाम् । तत्रैव शिबीनां विषयो देशः शैबः । उष्ट्राणां विषयो देशः औष्ट्रः । इत्थमुदाहरणद्वयं प्राप्यते । पदमञ्जरीकारः हरदत्तः प्रसङ्गेऽस्मिन् गान्धाराख्यं देशमुदाहरति । गान्धारिशब्दः जनपदाख्यश्च । तत्रस्थः राजा गान्धारः भवति। 'गान्धारिवणिजः' इत्युदाहरणं गान्धारिजनपदस्य वाणिज्यिकसम्बन्धं दर्शयति । काशिकायां गान्धारिशब्देन सह सविध–सनीड–समर्याद–सवेश–सदेशादिसामीप्यवाचिनां पदानां प्रयोगः दृश्यते। गान्धारदेशस्य जनाः भोजने कषायं पिबन्तीति काशिकाप्रदत्तात् 'कषायपाणा गन्धाराः' इति उदाहरणात् ज्ञायते । इत्थञ्चोदाहरणरूपेण काशिकावृत्तौ गान्धारिशब्दस्य बहुलप्रयोगात् गान्धारदेशस्य प्राचीनत्वं परिचीयते ।

6. कापिश्याः ष्फक्

'कापिश्याः ष्फक्' इति पाणिनीयसूत्रस्य व्याख्यानावसरे कापिशीनामकस्य प्राचीनदेशस्य सूचना प्राप्यते । अत्र 'कापिशायनं मधु', 'कापिशायनी द्राक्षा' इत्येवमुदाहरणद्वयम् अवाप्यते । कापिशी नाम देशविशेषः । देशोऽयं द्राक्षादिफलानाम् उत्पत्तिस्थलरूपेण परिचितः आसीत् । यतः द्राक्षाफलस्य समृद्धिः शीतलेन जलवायुना समधिकं भवति, तस्मात् कापिशीनामकोऽयं देशः पर्वतमालान्वितः हिमाच्छन्नः आसीदिति ज्ञायते । अयम् 'उत्तरभारतीयदेशः' इति ऐतिहासिकैः प्रमाणितः ।

7. कच्छादिभ्यश्च

'कच्छादिभ्यश्च' इति पाणिनीयसूत्रे कच्छादिगणे देशवाचिनः सप्तदशसंख्याकाः शब्दाः उदाह्रियन्ते । तत्र कश्मीरः इत्यन्यतमः । 'कश्मीराणां राजन्' इत्युदाहरणं काशिकायां प्राप्यते । अस्मात् देशोऽयं राजशासितः आसीदित्यनुमीयते । काश्मीरवाणिजः इत्युदाहरणं कश्मीरदेशस्य समृद्धेः परिचायकमस्ति। एतदतिरिक्तं काश्मीरसदेशं काश्मीरसनीडं काश्मीरसमर्यादं काश्मीरसविधं काश्मीरसवेशं चेत्येतानि उदाहरणानि कश्मीरदेशस्य गौरवं वर्धयन्ति ।

8. सिन्धुतक्षशिलादिभ्योऽणञौ

'सिन्धुतक्षशिलादिभ्योऽणञौ' इति सूत्रस्य व्याख्यानावसरे 'सैन्धवः' इत्युदाहरणं प्राप्यते । सिन्धुः अभिजनः अस्य इति सैन्धवः । यत्र सम्प्रत्युष्यते स निवासः । यत्र पूर्वैरुषितं सोऽभिजनः । सिन्धुदेशे यस्य पूर्वबान्धवाः वसन्ति स्म, सः सैन्धवः इति पदेन अभिधीयते । वस्तुतः सूत्रे सिन्ध्वादिगणः भगवता पाणिनिना पठितः । अस्मिन् गणे सिन्धुदेशेन सह अन्ये दशसंख्याकाः प्राचीनाः देशाः अपि परिचिताः । अत्र पूर्वोक्तयोः गान्धारकश्मीरदेशयोरपि गणना वर्तते । कच्छादिगणे च सिन्धुदेशस्य अन्तर्भावः दृश्यते । सिन्धुदेशीयानां मनुष्याणां कृते काशिकायां संगृहीतम् उदाहरणत्रयमाकर्षणीयं वर्तते । सैन्धवकः मनुष्यः, सैन्धवकमस्य हसितं जल्पितम्, सैन्धविका चूड़ा इत्येवमुदाहरणत्रयं सिन्धुदेशस्य वैशिष्ट्यं तनोति । एतानि सर्वाण्यपि प्राप्तोदाहरणानि सिन्धुदेशस्य समृद्धिसूचकानि ।

9. पारस्करप्रभृतीनि च संज्ञायाम्

'पारस्करप्रभृतीनि च संज्ञायाम्'इति सूत्रस्य व्याख्यानावसरे पारस्करदेशः उदाहृतः । पारङ्करोतीति पारस्करः । पारस्करः देशसंज्ञावाचकः । ऋक्तन्त्रे पारस्करः पर्वतनाम्ना अभिहितः। गृह्यसूत्रस्य रचनाकारः महर्षिः अपि पारस्करः इति ज्ञायते । महाभाष्ये काशिकायां च देशरूपेण उदाहृतः । तस्मात् प्राचीनदेशत्वेन पारस्करस्य नाम ऐतिहासिकैः स्वीक्रियते ।

10. ब्रह्मणो जानपदाख्यायाम्

'ब्रह्मणो जानपदाख्यायाम्' इति सूत्रस्य व्याख्यानावसरे सुराष्ट्रदेशस्य सूचना प्राप्यते । तत्र 'सुराष्ट्रब्रह्मः' इत्युदाहरणं सुराष्ट्रदेशस्य अस्तित्वे प्रमाणम् । सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः । तत्र 'अवन्तिब्रह्मः' इत्यपरम् उदाहरणम् अवन्तिदेशस्य सूचनापरकमस्ति । अवन्तिषु ब्रह्मा अवन्तिब्रह्मः।

11. ब्रह्मणकोष्णिके संज्ञायाम्

'ब्रह्मणकोष्णिके संज्ञायाम्' इति सूत्रस्य व्याख्यानावसरे ब्रह्मणकदेशस्य परिचयः अवाप्यते । यत्र आयुधजीविनः ब्रह्मणाः

ISSN : 2582-9092

सन्ति तत्र 'ब्रह्मणक' इति संज्ञा । ब्रह्मणको देशः । अस्मात् ज्ञायते यत् ब्रह्मणकदेशे ब्रह्मणाः निवसन्ति । ते च अस्त्रशस्त्रादिभिः स्वजीविकां निर्वाहयन्ति स्म । एतादृशं वैलक्षण्यं काशिकोदाहरणष्वेव संलक्ष्यते । काशिकावृत्तौ अन्यत्र 'ब्रह्मणराज्यम्' इत्युदाहरणं प्राप्यते। 'ब्रह्मणानां राज्यम् ब्रह्मणराज्यम्' इत्येवं षष्ठीतत्पुरुषसमासः तत्राश्रीयते । ब्रह्मणानां कृते विशिष्टराज्यस्य व्यवस्था आसीदिति अनेन उदाहरणेन अनुमीयते ।

12. आयुधजीविसङ्घाञ्ञ्यङ् वाहीकेष्वब्रह्मणराजन्यात्

'आयुधजीविसङ्घाञ्ञ्यङ् वाहीकेष्वब्रह्मणराजन्यात्' इति सूत्रस्य व्याख्यानावसरे क्षुद्रकदेशस्य मालवदेशस्य च सूचना प्राप्यते । आयुधजीविनां सङ्घरूपेण देशद्वयं प्रसिद्धमासीत् । द्वयोः देशयोः सेनासंघठनं बलिष्ठमासीत् । वस्तुतः एतद्देशीयाः योद्धारः आसन्निति काशिकागतोदाहरणमेव प्रमाणम् ।

13. अकथितं च

'अकथितं च' इति सूत्रस्य व्याख्यानावसरे पुरुदेशस्य सूचना अवाप्यते । पुरुदेशस्य राजा 'पौरवः' इति कथ्यते । असौ महान् दानी आसीदिति ज्ञायते । 'पौरवं गां याचते', 'पौरवं गां भिक्षते' इति उदाहरणद्वयमत्र प्रमाणम् ।

14. पुरे प्राचाम्

'पुरे प्राचाम्' इति सूत्रस्य व्याख्यानावसरे शिवदेशस्य सूचना लभ्यते । देशोऽयं प्राश्चात्यदेशरूपेण काशिकाकारसमये परिचितः । तत्रैव 'शिवदत्तपुरम्' इति प्राच्यदेशस्य उल्लेखः वर्त्तते ।

15. अवृद्धादपि बहुवचनविषयात्

'अवृद्धादपि बहुवचनविषयात्' इति सूत्रस्य व्याख्यानावसरे दार्वाः, जाम्बाः, अङ्गाः, वङ्गाः, कलिङ्गा, कालञ्जराः, वैकुलिशाः इत्येवं सप्तानां देशानां नामानि उदाहृतानि वर्त्तन्ते। बहुवचनप्रयोगात् जनपदसमूहः इति ज्ञायते । एतेभ्यः देशेभ्यः समुत्पन्नाः मनुष्याः अपि यथाक्रमं दार्वाकः, जाम्बकः, आङ्गकः, वाङ्गकः, कालिङ्गिकः, कालञ्जरकः, वैकुलिशकः इत्येवं विशेषणैः परिचीयन्ते ।

16. रोपधेतोः प्राचाम्

प्राच्यदेशरूपेण काशिकावृत्तौ देशद्वयस्य प्रसिद्धिः वर्त्तते । 'रोपधेतोः प्राचाम्'इति सूत्रस्य व्याख्यानावसरे पाटलिपुत्रः, एकचक्रः इत्येवं देशद्वयमिदम् उदाहृतम् । दत्तमित्रः इति पाश्चात्यदेशस्य सूचना अस्य सूत्रस्य प्रत्युदाहरणात् ज्ञायते । माकन्दीनगरस्य उदाहरणमपि प्राप्यतेऽत्र ।

17. केकयमित्रयुप्रलयानां यादेरियः

'केकयमित्रयुप्रलयानां यादेरियः' इति सूत्रस्य व्याख्यानावसरे 'केकयस्यापत्यं कैकेयः' इति उदाहरणं प्राप्यते । रामायणे वर्णितं विदितञ्च कैकेयीचरित्रम् केकयदेशस्य प्राचीनत्वं सूचयति । अत्रस्थः निवासी 'कैकेयः' इति परिचीयते । केकयजनपदः आधुनिकगुजुराटप्रदेशस्य प्राचीनं नाम आसीदिति ज्ञायते ।

२.१६ क्षेमप्रियमद्रेऽण्च

मद्रशब्दसंश्लिष्टाः नैके उदाहरणशब्दाः काशिकावृत्तौ प्राप्यन्ते । तद्यथा– मद्रकः, मद्रकारः, मद्रकेकयाः, मद्रङ्करः, मद्रचरः, मद्रचरी, मद्रबाहुकः, मद्रराजः, मद्रवाणिजः, मद्रह्रदः, मद्राः करं विनयन्ते, मद्राणां राजन्, मद्राणां राज्ञी मद्रराज्ञी चेति । मद्रदेशस्य जनः मद्रकः इति व्यपदिश्यते। मद्रशब्दोऽपि कल्याणार्थकः । मद्रं करोति इति मद्रकारः । सम्भवतः मद्रदेशस्य नामान्तरं स्यात्। मद्रदेशः पर्यटनानां कृते सर्वोत्कृष्टस्थलमासीदिति विचार्यते । मद्रचरः, मद्रचरी इति उदाहरणद्वयमत्र प्रमाणम् । मद्रेषु चरतीति मद्रचरः, मद्रचरी वा । मद्रराजः इति उदाहरणं मद्रदेशस्य प्रसिद्धिं व्यनक्ति। 'मद्रकेकयाः' इति उदाहरणं मद्रकेकययोः देशयोः सम्बन्धं द्योतयति । सम्भवतः अनयोः देशयोर्मध्ये वाणिज्यिकसम्बन्धः दृढः असीत् । मद्रवाणिजः इति उदाहरणमपि काशिकायां प्राप्यते । मद्रदेशस्य सामीप्यं द्योतयितुं काशिकाकारः नैकानि उदाहरणपदानि व्यवहरति । यथा–मद्रसदेशम्, मद्रसनीड़म्, मद्रसमर्यादम्, मद्रसविधम् चेति । मद्रदेशस्य ह्रदः मद्रह्रदः इति व्यपदिष्टः। मद्रदेशस्य प्रजाजनाः मद्राः इति नाम्ना ज्ञायन्ते । तेषां करविनिमयस्य परिचयः काशिकोदाहरणेषु प्राप्यते । मद्रदेशस्य प्रजानां राज्ञः कृते करप्रदानमुल्लिखितं वर्त्तते । करो नाम राजग्राह्यो भागः कर्षकैः रक्षार्थं परिकल्पितः ।

18. विभाषोशीनरेषु

पाणिनीयसूत्रे उशीनरदेशस्य सूचना प्राप्यते । तदनुसारम् उशीनरः वाहीकग्रामरूपेण पठ्यते । परन्तु काशिकावृत्तौ 'विभाषोशीनरेषु' इति सूत्रस्य व्याख्यानावसरे काशिकोदाहरणरूपेण 'सुदर्शनम्', 'आह्वजालम्' इति नगरद्वयस्योल्लेखः ।

ISSN : 2582-9092

महाभारते 'राजानमौशीनरं शिबिम्' इत्युल्लेखः वर्त्तते । येन 'शिबिः' उशीनरदेशस्य राजा इति अभिज्ञायते । उशीनरदेशस्य जनाः उशीनराः इति कथ्यन्ते । तेषां भोजने दुग्धजातीयद्रव्याणां बहुलप्रयोगः आसीत् । उशीनरदेशवत् वाहीकदेशस्य काचित् सूचना काशिकोदाहरणषु नैव प्राप्यते । 'वाहीकग्रामेभ्यश्च' इति पाणिनीयं सूत्रमेव अस्य देशस्य सूचनापरकमस्ति । अस्य सूत्रस्य व्याख्यानावसरे 'शकलः', 'मन्थवः' इति वाहीकग्रामद्वयस्य उदाहरणं काशिकायां संगृहीतम् ।

'अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः' इति सूत्रस्य व्याख्याने 'अम्बष्ठः', 'आम्बष्ठः' इत्येवमुदाहरणद्वयं प्राप्यते । अम्बष्ठदेशस्य राजा आम्बष्ठ्यः इति विशिष्यते। आम्बष्ठशब्दात् ञ्यङ्प्रत्यये कृते 'आम्बष्ठ्यः' इति रूपं जायते । अम्बष्ठदेशस्य पुरुषः आम्बष्ठ्यः, नारी च आम्बष्ठ्या इति व्यपदेशः ।

19. पञ्चम्यपाङ्परिभिः

'पञ्चम्यपाङ्परिभिः' इति सूत्रस्य व्याख्यानावसरे 'अप त्रिगर्त्तेभ्यः वृष्टो देवः' इति उदाहरणं प्राप्यते। अत्र त्रिगर्त्तदेशः सूचितः । 'त्रिगर्त्तदेशं वर्जयित्वा सर्वत्र वृष्टिः अभवत्' इति सूचयितुं कश्चित् एतादृशम् उदाहरणवाक्यं श्रावयति । अस्य देशस्य जनाः वृष्टिविषये सचेतनाः आसन् इत्यस्मात् उदाहरणात् ज्ञायते। अथवा अनावृष्टिपीडितः देशोऽयम् इति बुध्यते । 'राजन्यादिभ्यो वुञ्' इति सूत्रस्य व्याख्यानावसरे 'त्रैगर्त्तिकः' इति उदाहरणं प्राप्यते । त्रिगर्त्तदेशस्य राजा 'त्रैगर्त्तकः' इति ज्ञायते ।

20. साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्

'साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्' इति पाणिनीयसूत्रस्य व्याख्यानदशायां 'साल्वः' इति साल्वो जनपदवाची शब्दः उदाहृतः। साल्वः क्षत्रियाणां देशः आसीत् । एतद्देशीयाः 'साल्वेयाः' इति नाम्ना अभिधीयन्ते । देशोऽयं समृद्धः कृषिप्रधानश्च आसीत् । अस्मिन् देशे प्रसूतः गौः 'साल्वकः' इति उच्यते । अस्मिन् देशे उत्पन्ना यवागूः 'साल्विका' इति कथ्यते । साल्वदेशस्य जनाः 'साल्वकाः' इति उच्यन्ते । तेषां जीवनं सरलम् आनन्दपूर्णञ्च आसीत् । साल्ववासिनः निरन्तरं पादाभ्यामेव व्रजन्ति स्म । अस्य देशस्य राजा 'साल्वेयः' आसीत् ।

21. तदस्मिन्नस्तीति देशे तन्नाम्नि

तदस्मिन्नस्तीति देशे तन्नाम्नि इति सूत्रस्य व्याख्यानदशायाम् औदुम्बरदेशस्य नाम प्राप्यते । अस्य देशस्य राजा औदुम्बरी इति कथ्यते । 'औदुम्बरी राजासन्दीभवति' इति उदाहरणं देशेऽस्मिन् राजकीयशासनस्य पराकाष्ठां द्योतयति । औदुम्बरदेशस्य पितृपुत्राणां कृते 'औदुम्बरिः' इति शब्दः प्रचलितः आसीत्।

22. विभाषा कुरुयुगन्धराभ्याम्

'विभाषा कुरुयुगन्धराभ्याम्'इति सूत्रस्य व्याख्यानावसरे युगन्धरदेशस्य सूचना उदाहरणशब्दरूपेण प्राप्यते । युगन्धरदेशीयाः जनाः 'यौगन्धराः', 'यौगन्धरिकाः' इत्येवं कथ्यन्ते । युगन्धरदेशस्य पितृपुत्राणां कृते 'युगन्धरिः' इति उदाहरणं प्रयुक्तं दृश्यते । वस्तुतः साल्वावयवभूताः ये देशाः सन्ति, तेषु युगन्धरः अन्यतमः वर्त्तते । तथा चोच्यते,

उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः ।।

युगन्धरः पर्वतः इति उदाहरणं देशस्य भौगोलिकपरिवेशस्य सूचकमस्ति । सम्भवतः देशोऽयं पर्वतमण्डितः आसीत् । विभाषा कुरुयुगन्धराभ्याम्' इति सूत्रस्य व्याख्यानावसरे कुरुदेशस्य सूचना प्राप्यते । अस्मिन् पाणिनीयसूत्रे देशोऽयम् उल्लिखितः । काशिकायां कौरवः, कौरवकः मनुष्यः इति उदाहरणद्वयेन कुरुदेशस्य जनाः अभिधीयन्ते । प्राचीनोऽयं कुरुदेशः वैभवशाली असीत् । सेनासम्पन्नः देशोऽयम् । अत्रस्था सेना कौरवी इति नाम्ना प्रसिद्धा आसीत् । कुरुदेशस्य पिता, पुत्रश्च कौरव्यः इति नाम्ना अभिहितौ । कुरुदेशस्य राजा कौरव्यः इति ख्यातः । अयं देशः क्षत्रियजातिनां निवासभूमिः आसीत् । अत्र क्षत्रियजातौ विद्यमानाः जनाः 'कौरव्याः', 'कौरव्यायणिः' इत्येवमुच्यन्ते । 'कौरव्यायणी' कुरुदेशस्य नारी । 'कौरवकमस्य हसितम्' इति लोकप्रचलितम् उदाहरणं कुरुदेशस्य अस्तित्वं द्योतयति। कुरुदेशविषयकं कथनमिदं लोके प्रसिद्धमासीत् । कुरुदेशे अनेके यायावराः स्वकार्यसिद्धये विचरन्ति स्म । तेषु पुरुषस्य कृते 'कुरुचरः', स्त्रीजनस्य कृते 'कुरुचरी' इत्येवं व्यवहारः प्रचलितः आसीत् 'तत्र जातः' इति सूत्रस्य व्याख्यानावसरे स्रुघ्नदेशस्य परिचयः अवाप्यते । एतत्पाणिनीयसूत्रानुसारमेव तत्रस्थाः जनाः स्रौघ्नाः इति कथ्यन्ते । अन्यत्र 'स्रौघ्नदेशीयाः', 'स्रौघ्नजातीयाः' इति उदाहरणद्वयमपि देशस्य परिचयं दृढ़ीकरोति । स्रुघ्नदेशं प्रति गम्यमानः मार्गः दूतः वा 'स्रौघ्नः' इति व्यपदिश्यते । कान्यकुब्जदेशस्य मार्गः स्रुघ्नदेशं यावत् व्याप्तः आसीत् । स्रुघ्नदेशस्य स्त्रीजनः 'स्रौघ्नी' । स्रौघ्नी भार्या यस्य सा

'स्रौघ्नीभार्यः' इति प्रयोगः । स्रौघ्नी इव आचरति इत्यर्थे 'स्रौघ्नीयते' इति उदाहरणशब्दः लोके प्रचलितः आसीत् । स्रौघ्नीं मन्यते या सा 'स्रौघ्नीमानिनी' इति ।

23. अवृद्धादपि बहुवचनविषयात्

'अवृद्धादपि बहुवचनविषयात्'इति सूत्रस्य व्याख्यानावसरे अजमीढदेशस्य अजक्रन्ददेशस्य च सूचना प्राप्यते । अत्र 'अजमीढाः', 'आजमीढकः' अजक्रन्दाः, आजक्रन्दकाः इति उदाहरणानि अनयोः देशयोः सूचकानि । अनयोः देशयोः जनाः यथाक्रमं 'आजमीढकाः', 'आजक्रन्दकाः' इति ज्ञायन्ते । काशिकानुसारं देशद्वयं जनपदावधिरूपेण परिचितम् । बृहत्कायस्य जनपदस्य अवयवभूतौ एतौ देशौ इत्याशयः । सम्भवतः अजैः सह अनयोः देशयोः सम्बन्धः असीदिति अनुमातुं शक्यते ।

24. राजन्यादिभ्यो वुञ्

'राजन्यादिभ्यो वुञ्' इति सूत्रस्य व्याख्यानदशायां मालवकदेशस्य परिचयः लभ्यते । तत्रस्थाः जनाः 'मालवाः' इति कथ्यन्ते । तेषां देशः 'मालवकः' इति ख्यातः । मालवानाम् आयुधजीविसत्र असीत् । सः आयुधजीविसत्र 'मालव्यः' इति उच्यते । अत्र स्त्रीजनाः अपि आयुधेन जीविकां निर्वाहयन्ति स्म । स्त्रीजनानाम् अयुधसत्रः 'मालवी' इति कथ्यते । अस्मात् मालवकदेशीयाः युद्धप्रियाः इति अनुमीयन्ते ।

25. जनपदशब्दात् क्षत्रियादञ्

'जनपदशब्दात् क्षत्रियादञ्'इति सूत्रस्य व्याख्यानावसरे पञ्चालदेशस्य परिचयः लभ्यते । पञ्चालदेशस्य राजा 'पाञ्चालः' इति ख्यातः । अत्र जनपदानां स्वामी ब्रह्मणः नासीदिति ज्ञायते । अनेन पञ्चालदेशस्य राजा क्षत्रियः आसीदिति निश्चीयते । परन्तु देशेऽस्मिन् ब्रह्मणाः अपि निवसन्ति स्म। ब्रह्मणस्य पाञ्चालस्य अपत्यं 'पाञ्चालिः' इति कथ्यते । पञ्चालदेशस्य कन्या पाञ्चाली इत्यभिधीयते। पञ्चालदेशस्य शासकः ब्रह्मदत्तः आसीदिति उल्लेखः काशिकायां दृश्यते । पञ्चालप्रदेशः ब्रह्मदत्ताधीनः, ब्रह्मदत्तश्च पञ्चालदेशस्य ईश्वरः इत्येवं प्रमाणं काशिकोदाहरणेषु अभिव्यज्यते। पाञ्चालदेशे राजतन्त्रं सुप्रचलितमासीदिति निश्चीयते एव गवेषकैः । अस्य देशस्य निवासिनः सर्वपाञ्चालकः, पूर्वपाञ्चालकः, उत्तरपाञ्चालकः चेति परिचिताः भवन्ति । अस्मात् पञ्चालदेशः पूर्वोत्तरभागाभ्यां विभक्तः आसीदिति ज्ञायते ।'जनपदशब्दात् क्षत्रियादञ्' इति सूत्रस्य व्याख्यानावसरे विदेहदेशस्य परिचयश्च लभ्यते । विदेहदेशस्य राजा वैदेहः उच्यते । अनेन देशेन सह 'मगधः', 'पञ्चालः' इत्यनयोः देशयोः सम्बन्धः आसीत्। एते देशाः एकत्र उदाहृताः दृश्यन्ते । विदेहराजकन्या वैदेही इति नाम्ना प्रसिद्धा आसीत् । रामायणस्य सीता वैदेही इति नाम्ना परिचितत्वात् विदेहदेशस्य प्राचीनत्वं समृद्धत्वञ्च स्पष्टीयेते । वैदिकसंस्कृतेः परिचायकोऽयं देशः आसीदिति ऐतिहासिकैः समर्थ्यते ।

26. रङ्कोरमनुष्येऽण् च

'रङ्कोरमनुष्येऽण् च' इति सूत्रस्य व्याख्यानावसरे रङ्कुदेशस्य सूचना लभ्यते । रङ्कुदेशस्य गौः 'राङ्कवः', 'राङ्कवायणः' वेति कथ्यते । गोसम्पदा देशोऽयं समृद्धशाली आसीदिति अस्मात् ज्ञायते। मनुष्यश्च राङ्कवकः इत्युच्यते । एतद्देशीयाः कम्बलस्य समधिकं व्यवहारं कुर्वन्ति स्म। 'राङ्कवः कम्बलः' इत्युदाहरणमत्र प्रमाणम्। भौगोलिकदृष्ट्या शीतलजलवायुयुक्तः देशोऽयमिति प्रतिभाति ।

27. कृकणपर्णाद्भारद्वाजे

'कृकणपर्णाद्भारद्वाजे' इति सूत्रस्य व्याख्यानदशायां भारद्वाजदेशवाचीनाम् उदाहरणं प्राप्यते । 'कृकणीयम्', 'पर्णीयम' इति उदाहरणपदद्वयं यथाक्रमं 'कृपण', 'पर्ण' इत्यनयोः शब्दयोः निष्पद्यते। सम्भवतः भरद्वाजदेशे विद्यमानौः 'कृपणः', 'पर्णः' इत्यभिहितौ प्रसिद्धौ द्वौ ग्रामौ काशिकायाम् उल्लिखितौ ।

28. वृद्धेत्कोसलाजादाञ्ञ्यङ्

'वृद्धेत्कोसलाजादाञ्ञ्यङ्' इति सूत्रस्य व्याख्यानावसरे कोसलदेशस्य सूचना लभ्यते । कोसलदेशस्य स्त्रीजनाः 'कौसल्याः' संज्ञिताः भवन्ति । रामायणस्य कौसल्याचरित्रं कोसलदेशस्य अस्तित्वं प्राचीनत्वञ्च व्यनक्ति । कौसल्यायनिः इति उदाहरणमपि काशिकायां दृश्यते । देशवाचिनः कोसलशब्दादेव कौसल्यायनिः इति रूपं निष्पन्नम् । 'कोसल', 'कोशल' इत्यनयोः शब्दयोः मध्ये कस्य शब्दस्य तावत् देशत्वेन ग्रहणमिति व्याख्याकाराः मिथः भिन्नं मतं पोषयन्ति । तत्र न्यासकारस्य व्याख्याने कोशलशब्दः पठितः । परन्तु पदमञ्जरीकारेण च कोसलशब्दः पठितः। वस्तुतः काशिकायां कोसलः इत्येव देशवाचित्वेन स्वीकृतः दृश्यते ।'न द्व्यचः प्राच्यभरतेषु' इति सूत्रस्य व्याख्यानावसरे काशीदेशस्य सूचना दीयते ।

ISSN : 2582-9092

काशीदेशस्य छात्राः 'काशीयाः' इत्यभिधीयन्ते । अस्मात् काशीदेशः विद्याग्रहणाय सर्वोत्कृष्टं स्थानमासीत् । अस्य राजधानी वारणासी आसीत् । 'काशिकोशलाः', 'काशिकोशलीयाः' इत्येवम् उदाहरणद्वयं काशीदेशस्य कोशलदेशेन साकं सम्बन्धं सूचयति ।

'कार्तकौजपादयश्च' इति सूत्रस्य व्याख्यानावसरे कुन्तिदेशस्य परिचयः लभ्यते । कुन्तिराजस्य पुत्री कुन्ती इति नाम्ना उच्यते । कुन्तेरपत्यं गोत्रं स्त्री कुन्ती । कुन्तिदेशस्य राजा कौन्त्यः इति प्रसिद्धः। कोसलदेशेन सह उदाहृतः दृश्यते अयं देशः । कोसलराजेन सह कुन्तिराजस्य सम्बन्धः आसीत् ।

'लुपि युक्तवद् व्यक्तिवचने' इति सूत्रस्य व्याख्यानावसरे सुह्मदेशस्य परिचयः लभ्यते । सुह्मदेशस्य निवासिनः सुह्माः इत्यभिधीयन्ते । पञ्चालः, मगधः, मत्स्यः, अङ्गः, पुण्ड्रः इत्येतैः देशैः साकं सुह्मदेशस्य परिगणनमत्र प्राप्यते । सुह्मनगरमिति उदाहरणं सुह्मदेशस्य विकसितं स्वरूपं प्रतिपादयति।

धूमादिभ्यश्च इति सूत्रस्य व्याख्यानावसरे खण्डदेशस्य सूचना लभ्यते । खण्डदेशे येषां जन्म तेषां खाण्डकाः इति अभिधानम् । खण्डदेशस्य जनाः खण्डिकाः इति चोच्यन्ते । खण्डिकानां समूहः खाण्डिकम् इति । 'खाण्डिकेन प्रोक्तमधीयते खाण्डिकीयाः' इत्युदाहरणं खण्डदेशीयानाम् अध्ययनप्रियत्वं सूचयति ।

'शेषो बहुव्रीहिः' इति सम्स्य व्याख्यानावसरे 'उन्मत्तगङ्गम्', 'लोहितगङ्गम्' इति देशद्वयस्य परिचयः लभ्यते । 'अन्यपदार्थे च संज्ञायाम्' इति सूत्रे संगृहीतम् 'उन्मत्तगङ्गं नाम देशः', 'लोहितगङ्गम्', 'कृष्णगङ्गम्, 'शनैर्गङ्गम्', 'शीघ्रगङ्गो देशः' इत्युदाहरणानि प्राप्यन्ते । गङ्गाप्रवाहस्य वर्णनपरकाणि देशनामानि एतानि । उन्मत्ता गङ्गा यस्मिन् देशे तदिदमुन्मत्तगङ्गं नाम देशः । अनुरूपमेव शीघ्र गङ्गा यत्र सः शीघ्रगङ्गः नाम देशः । गङ्गानद्याः समीपवर्तिनः एते देशाः इत्याशयः। गङ्गायाः साहचर्यात् पवित्रदेशाः एते । प्रायेण प्राचीनप्रदेशाः नदीनां समीपे एव उद्भूताः आसन्निति एतैः उदाहरणैः ज्ञायते ।

'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति सूत्रस्य व्याख्यानावसरे अवन्तिदेशस्य सूचना अवाप्यते । अवन्तिदेशस्य राज्ञः आवन्त्यः इति तथा अवन्तिराजकन्यायाः अवन्ती इति च अभिधाने । अवन्तिदेशस्य प्रजाजनाः अवन्तयः इत्यभिधेयाः । महाभारते प्रसिद्धजनपादरूपेण अवन्तिदेशः चित्रितः वर्तते । अस्य राजधानी उज्जयिनी आसीत् ।

'कुमुदनडवेतसेभ्यो ड्मतुप्'इति सूत्रस्य व्याख्यानावसरे 'महिषाच्चेति वक्तव्यम्' इति वार्तिकं पठितम्। तत्रैव महिष्मान्नामकस्य देशस्य परिचयः लभ्यते । काशिकायामन्यत्र 'महिषिकः' इति नामान्तरमस्य देशस्य प्राप्यते। महिषकदेशे उद्भवत्वात् तत्रस्थाः जनाः 'माहिषकाः' इत्यभिधीयन्ते। तेषां धर्म्यं माहिषमुच्यते । माहिषकाः सदाचारसम्पन्नाः आसन् । 'माहिषकपुत्रः' इत्युदाहरणं माहिषकानामस्तित्वं दृढीकरोति ।

29. उपसंहारः

शोधप्रबन्धेऽस्मिन् चत्वारिंशदधिकाः देशवाचकाः शब्दाः उपस्थापिताः । एते शब्दाः पाणिनीयसूत्राणां व्याख्यानप्रसङ्गे काशिकावृत्तौ पठिताः । सूत्रव्याख्यानस्य पद्धतिः उदाहरणशब्दानां पठनं विना नैव सम्पन्नतां प्राप्नोति । तत्र उदाहरणशब्दानां प्रासङ्गिकता तु अपरिहार्यरूपेण तिष्ठति । परं प्रस्तुताध्ययने उदाहरणरूपेण प्रदत्तानां तेषां समस्तानां देशवाचकानां शब्दानां पर्यालोचनया एतत् स्पष्टीभवति यत् प्राचीनैतिह्यस्य सुरक्षायै संगृहीतानाम् उदाहरणानामनवद्या भूमिका वर्तते एव। प्रकारान्तरेण काशिकावृत्तेः कर्तारौ वामनजयादित्यौ पाणिनीयसूत्राणां व्याख्यानावसरे प्राचीनदेशवाचकानां शब्दानां परिचयं प्रदाय संस्कृतशोधवाङ्मये नवीनां धाराम् अजनयताम् । प्राचीनभारते एवम्भूतानां देशानाम् अस्तित्वमासीदिति प्रामाणणीकर्तुं अग्रतः गत्वा पुनरनुसन्धानम् अपेक्षते । येन नवीनात् नवीनतराणां प्राचीनतत्त्वानां ज्ञानं भवेत् । अस्यां धारायां शोधपत्रमिदं किञ्चिदुपकारकं स्यात् ।

किं बहुना काशिकाग्रन्थस्य सविस्तरम् अध्ययनेन पुण्यभूमेः भारतस्य एकं भौगोलिकस्वरूपमाकलयितुं शक्यते । ऐतिहासिकरूपेण वामनजयादित्ययोः संस्कृतभाषासाहित्यं प्रति महत्त्वपूर्णमवदानं स्यादित्यनुमातुं च शक्यते । काशिकावृत्तिगतोदाहरणानि पाणिनीयशास्त्रप्रवृत्तानाम् आधुनिकानां विद्यार्थिनां शोधार्थिनाञ्च कृते महोपकारकाणि भवन्तीत्यभिप्रायः। उदाहरणान्येव पाणिनीयसूत्राणां क्रमशः प्रवृत्तिं बोधयन्ति । अत एव पाणिनीयव्याकरणे व्यावहारिकदृष्ट्या प्रवेशः काशिकोदाहरणद्वारैव साध्यः। संस्कृतं विहाय इतरभाषागवेषणाक्षेत्रे प्रवृत्तानां गवेषकानां कृतेऽपि काशिकाध्ययनं फलदायि भवेत् ।

ISSN : 2582-9092

**Bibliography:**

1. Agrawala, V.S., (1953), *India as Known to Pāṇini*, University of Lucknow, Lucknow
2. Cardona, George, (1988), *Pāṇini : His works and Its Traditiona*, Volume- I, Motilal Banarasidass, Delhi
3. Dash, Radha Madhab, *Idioms in Kāśikā*, Pratibha Prakashan, Delhi, 1995
4. Deshpande, Madhav M., and Madhav Deshpande. *Sanskrit & Prakrit, sociolinguistic issues*. No. 6. Motilal Banarsidass Publ., 1993.
5. Dīkṣita, Bhaṭṭojī. *Siddhanta kaumudi: with Tattvabodhinī commentary of Jñānendra Sarasvatī and the Subodhinī commentary of Jayakṛṣṇa*. Vol. 1, Caukhambā Saṃskṛta Pratiṣṭhāna, 1985.
6. Dīkṣita, Bhaṭṭoji. *The Siddhanta Kaumudi [Siddhānta-kaumudī]: Ed. and Transl. Into Engl. by Śriśa Chandra Vasu and Vāmana Dāsa Vasu*. Panini Office, 1905.
7. Grimal, F.(Ed), Venkataraja Sarma, V. (Ed.) Srivatsankacharya, V.(Ed.), Lakshminarasimham, S. (Ed.), *Pāṇinīyavyākaraṇodāharaṇakośaḥ* (Paninian Grammar through its Example), Vol.I , Vol.II & Vol.III(2), Rashtriya Sanskrit Vidyapeetha, Tirupati, 2007.
8. Kielhorn, F. (Ed.), Abhyankar, Kashinath Yasudev, *The Vyākaraṇa Mahābhāṣya of Patanjali*, Third Edition, Pune, 1972.
9. *Kāśikā, Vāmanajayādityaviracitā, JayaśaṀkaralāltripāṭhinā sudhākaramālaviyen ca sampāditā*, Tarā Book Agency, Vārāṇasī, 1984.
10. Tripathi, Jaysankarlal(Ed.), Malaviya, Sudhakar(Ed.), 1984, *Kāśikā of Jayāditya & Vāmana(Vol.I-X)*, Tara Book Agency, Varanasi
11. अग्रवालः, वासुदेवशरणः, पाणिनिकालीन भारतवर्ष, चौखम्बासंस्कृतसीरिज् आफिस्, चौखम्बाविद्याभवनम्, वाराणसी, सं २०६२
12. अग्निहोत्री, प्रभुदयालः, पतञ्जलिकालीन भारत, विहारराष्ट्रभाषापारिषद्, पाटना, १६६...

Assistant Professor
Department of Sanskrit
Utkal University, Vani Vihar, Bhubaneswwar-751004
E-mail ID:das.dharmendra0@gmail.com